# ॥ वाल्मीकि रामायण ॥

## ५ सुन्दरकाण्ड

### अध्याय ४४

हतान्मन्त्रिसुतान्बुद्ध्वा वानरेण महात्मना ।
रावणः संवृताकारश्चकार मतिमुत्तमाम् ॥ १॥

स विरूपाक्षयूपाक्षौ दुर्धरं चैव राक्षसं ।
प्रघसं भासकर्णं च पञ्चसेनाग्रनायकान् ॥ २॥

सन्दिदेश दशग्रीवो वीरान्नयविशारदान् ।
हनूमद्ग्रहणे व्यग्रान्वायुवेगसमान्युधि ॥ ३॥

यात सेनाग्रगाः सर्वे महाबलपरिग्रहाः ।
सवाजिरथमातङ्गाः स कपिः शास्यताम् इति ॥ ४॥

यत्तैश्च खलु भाव्यं स्यात्तमासाद्य वनालयम् ।
कर्म चापि समाधेयं देशकालविरोधितम् ॥ ५॥

न ह्यहं तं कपिं मन्ये कर्मणा प्रतितर्कयन् ।
सर्वथा तन्महद्भूतं महाबलपरिग्रहम् ।
भवेदिन्द्रेण वा सृष्टमस्मदर्थं तपोबलात् ॥ ६॥

सनागयक्षगन्धर्वा देवासुरमहर्षयः ।
युष्माभिः सहितैः सर्वैर्मया सह विनिर्जिताः ॥ ७॥

तैरवश्यं विधातव्यं व्यलीकं किं चिदेव नः ।
तदेव नात्र सन्देहः प्रसह्य परिगृह्यताम् ॥ ८॥

नावमन्यो भवद्भिश्च हरिः क्रूरपराक्रमः ।
दृष्टा हि हरयः शीघ्रा मया विपुलविक्रमाः ॥ ९॥

वाली च सह सुग्रीवो जाम्बवांश्च महाबलः ।
नीलः सेनापतिश्चैव ये चान्ये द्विविदादयः ॥ १०॥

नैव तेषां गतिर्भीमा न तेजो न पराक्रमः ।
न मतिर्न बलोत्साहो न रूपपरिकल्पनम् ॥ ११॥

महत्सत्त्वमिदं ज्ञेयं कपिरूपं व्यवस्थितम् ।
प्रयत्नं महदास्थाय क्रियतामस्य निग्रहः ॥ १२॥

कामं लोकास्त्रयः सेन्द्राः ससुरासुरमानवाः ।
भवतामग्रतः स्थातुं न पर्याप्ता रणाजिरे ॥ १३॥

तथापि तु नयज्ञेन जयमाकाङ्क्षता रणे ।
आत्मा रक्ष्यः प्रयत्नेन युद्धसिद्धिर्हि चञ्चला ॥ १४॥

ते स्वामिवचनं सर्वे प्रतिगृह्य महौजसः ।
समुत्पेतुर्महावेगा हुताशसमतेजसः ॥ १५॥

रथैश्च मत्तैर्नागैश्च वाजिभिश्च महाजवैः ।
शस्त्रैश्च विविधैस्तीक्ष्णैः सर्वैश्चोपचिता बलैः ॥ १६॥

ततस्तं ददृशुर्वीरा दीप्यमानं महाकपिम् ।
रश्मिमन्तमिवोद्यन्तं स्वतेजोरश्मिमालिनम् ॥ १७॥

तोरणस्थं महावेगं महासत्त्वं महाबलम् ।
महामतिं महोत्साहं महाकायं महाबलम् ॥ १८॥

तं समीक्ष्यैव ते सर्वे दिक्षु सर्वास्ववस्थिताः ।
तैस्तैः प्रहरणैर्भीमैरभिपेतुस्ततस्ततः ॥ १९॥

तस्य पञ्चायसास्तीक्ष्णाः सिताः पीतमुखाः शराः ।
शिरस्युत्पलपत्राभा दुर्धरेण निपातिताः ॥ २०॥

स तैः पञ्चभिराविद्धः शरैः शिरसि वानरः ।
उत्पपात नदन्व्योम्नि दिशो दश विनादयन् ॥ २१॥

ततस्तु दुर्धरो वीरः सरथः सज्जकार्मुकः ।
किरञ्शरशतैर्नैकैरभिपेदे महाबलः ॥ २२॥

स कपिर्वारयामास तं व्योम्नि शरवर्षिणम् ।
वृष्टिमन्तं पयोदान्ते पयोदमिव मारुतः ॥ २३॥

अर्द्यमानस्ततस्तेन दुर्धरेणानिलात्मजः ।
चकार निनदं भूयो व्यवर्धत च वेगवान् ॥ २४॥

स दूरं सहसोत्पत्य दुर्धरस्य रथे हरिः ।
निपपात महावेगो विद्युद्राशिर्गिराविव ॥ २५॥

ततस्तं मथिताष्टाश्वं रथं भग्नाक्षकूवरम् ।

विहाय न्यपतद्भूमौ दुर्धरस्त्यक्तजीवितः ॥ २६ ॥

तं विरूपाक्षयूपाक्षौ दृष्ट्वा निपतितं भुवि ।
सञ्जातरोषौ दुर्धर्षावुत्पेततुररिन्दमौ ॥ २७ ॥

स ताभ्यां सहसोत्पत्य विष्ठितो विमलेऽम्बरे ।
मुद्गराभ्यां महाबाहुर्वक्षस्यभिहतः कपिः ॥ २८ ॥

तयोर्वेगवतोर्वेगं विनिहत्य महाबलः ।
निपपात पुनर्भूमौ सुपर्णसमविक्रमः ॥ २९ ॥

स सालवृक्षमासाद्य समुत्पाट्य च वानरः ।
तावुभौ राक्षसौ वीरौ जघान पवनात्मजः ॥ ३० ॥

ततस्तांस्त्रीन्हताञ्ज्ञात्वा वानरेण तरस्विना ।
अभिपेदे महावेगः प्रसह्य प्रघसो हरिम् ॥ ३१ ॥

भासकर्णश्च सङ्क्रुद्धः शूलमादाय वीर्यवान् ।
एकतः कपिशार्दूलं यशस्विनमवस्थितौ ॥ ३२ ॥

पट्टिशेन शिताग्रेण प्रघसः प्रत्यपोथयत् ।
भासकर्णश्च शूलेन राक्षसः कपिसत्तमम् ॥ ३३ ॥

स ताभ्यां विक्षतैर्गात्रैरसृग्दिग्धतनूरुहः ।
अभवद्वानरः क्रुद्धो बालसूर्यसमप्रभः ॥ ३४ ॥

समुत्पाट्य गिरेः शृङ्गं समृगव्यालपादपम् ।
जघान हनुमान्वीरो राक्षसौ कपिकुञ्जरः ॥ ३५ ॥

ततस्तेष्ववसन्नेषु सेनापतिषु पञ्चसु ।
बलं तदवशेषं तु नाशयामास वानरः ॥ ३६ ॥

अश्वैरश्वान्गजैर्नागान्योधैर्योधान्रथै रथान् ।
स कपिर्नाशयामास सहस्राक्ष इवासुरान् ॥ ३७ ॥

हतैर्नागैश्च तुरगैर्भग्नाक्षैश्च महारथैः ।
हतैश्च राक्षसैर्भूमी रुद्धमार्गा समन्ततः ॥ ३८ ॥

ततः कपिस्तान्ध्वजिनीपतीन्रणे
निहत्य वीरान्सबलान्सवाहनान् ।
तदेव वीरः परिगृह्य तोरणं
कृतक्षणः काल इव प्रजाक्षये ॥ ३९ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com